# 74

Total Pages : 2

## ENTRANCE EXAMINATION, 2016

### M.A. SANSKRIT

[ Field of Study Code : SANM (228) ]

*Time Allowed* : 3 hours | *Maximum Marks* : 100

समयः होरात्रयम् | अङ्काः 100

निर्देशः — केचन **विंशतिः (20)** प्रश्नाः समाधेयाः। प्रत्येकं प्रश्नस्य कृते **पञ्च (5)** अङ्काः निर्धारिताः सन्ति।

**Note** : Answer any **twenty (20)** questions. Each question carries **5** marks.

**1.** उपनिषदां प्रतिपाद्यं निरूपयत।

**2.** पञ्चमहायज्ञान् विशदयत।

**3.** श्रीमद्भगवद्गीतायां प्रयुक्तस्य कर्मयोगस्य परिचयः देयः।

**4.** "संस्कारमात्रजन्यं ज्ञानं स्मृतिः" इत्यस्य व्याख्या कार्या।

**5.** 'अकथितञ्च' इति सूत्रं व्याख्यायताम्।

**6.** 'समर्थः पदविधिः' इति सूत्रव्याख्या करणीया।

**7.** आधुनिककाले संस्कृतस्य प्रासङ्गिकतां विशदयत।

**8.** काव्यभेदान् निरूपयत।

**9.** यूनिकोड (Unicode) इत्यस्य स्वरूपं प्रतिपादयत।

**10.** संस्कृतस्य कृते सङ्गणकस्य उपयोगितां स्पष्टीकुरुत।

**11.** काव्यलक्षणं निरूपयत।

**12.** 'नान्दी'-लक्षणं स्पष्टयत।

13. संस्कृतवर्णमालायाः स्थानप्रयत्नान् विवेचयत।

14. 'अजाद्यतष्टाप्' इति सूत्रव्याख्या करणीया।

15. धर्मलक्षणं निरूपयत।

16. सामान्यपदार्थस्य स्वरूपं न्यायवैशेषिकदिशा प्रतिपादयत।

17. ''ज्ञाने मौनं क्षमा शक्तौ त्यागे श्लाघाविपर्ययः।
गुणा गुणानुबन्धित्वात्तस्य सप्रसवा इव॥''
इति श्लोकस्य ससन्दर्भव्याख्यां कुरुत।

18. रूपकभेदान् प्रतिपादयत।

19. अष्टाङ्गयोगः निरूप्यताम्।

20. पञ्चतन्त्रस्य विभागप्रदर्शनपूर्वकं तत्प्रतिपाद्यं विवेचयत।

21. मन्दाक्रान्ता-छन्दसः लक्षणं सोदाहरणं प्रतिपादयत।

22. भासस्य व्यक्तित्वं कृतित्वं च संक्षेपेण विवेचयत।

23. 'तस्मिन्निति निर्दिष्टे पूर्वस्य' इति सूत्रव्याख्या करणीया।

24. कस्यचिदेकस्य अलङ्कारस्य लक्षणं सोदाहरणं निरूपयत।

25. 'एचोऽयवायावः' इति सूत्रं सोदाहरणं विवेचयत।

★ ★ ★